# शारदा भुजङ्ग प्रयाताष्टकम्

सुवक्षोज कुम्भां सुधापूर्ण कुंभां
प्रसादा वलम्बां प्रपुण्या वलम्बाम् ।
सदास्येन्दु बिम्बां सदानोष्ठ बिम्बां
भजे शारदाम्बा मजस्रं मदम्बाम् ॥ १॥

कटाक्षे दयार्द्रां करे ज्ञानमुद्रां
कलाभि र्विनिद्रां कलापैः सुभद्राम् ।
पुरस्त्रीं विनिद्रां पुर स्तुङ्गभद्रां
भजे शारदाम्बा मजस्रं मदम्बाम् ॥ २॥

ललामाङ्क फालां लसद्गान लोलां
स्वभक्तैकपालां यशःश्री कपोलाम् ।
करे त्वक्षमालां कनत्प्रत्न लोलां
भजे शारदाम्बा मजस्रं मदम्बाम् ॥ ३॥

सुसीमन्त वेणीं दृशा निर्जितैणीं
रमत्कीरवाणीं नमद्वज्र पाणीम् ।
सुधामन्थ रास्यां मुदा चिन्त्य वेणीं
भजे शारदाम्बा मजस्रं मदम्बाम् ॥ ४॥

सुशान्तां सुदेहां दृगन्ते कचान्तां
लसत्सल्लताङ्गी मनन्ता मचिन्त्याम् ।
स्मरेत्तापसैः सङ्ग पूर्वस्थितां तां

भजे शारदाम्बा मजस्रं मदम्बाम् ॥ ५॥

कुरङ्गे तुरङ्गे मृगेन्द्रे खगेन्द्रे
मराले मदेभे महोक्षेऽधिरूढाम् ।
महत्यां नवम्यां सदा सामरूपां
भजे शारदाम्बा मजस्रं मदम्बाम् ॥ ६॥

ज्वलत्कान्ति वह्निं जगन्मोहनाङ्गीं
भजे मान साम्भोज सुभ्रान्त भृङ्गीम् ।
निजस्तोत्र सङ्गीत नृत्य प्रभाङ्गीम्
भजे शारदाम्बा मजस्रं मदम्बाम् ॥ ७॥

भवाम्भोज नेत्राज सम्पूज्यमानां
लसन्मन्दहास प्रभा वक्त्र चिह्नाम् ।
चलच्चञ्चला चारु ताटङ्क कर्णां
भजे शारदाम्बा मजस्रं मदम्बाम् ॥ ८॥

इति श्रीमच्छङ्करभगवतः कृतौ
शारदा भुजङ्ग प्रयाताष्टक सम्पूर्णम् ॥